தனி பிரதி விலை ரூ. 4

OCTOBER 2016

Samskritasri

A Monthly Journal of Samskrit Education Society

ஸம்ஸ்கருத கல்விக் கழகம் மாத இதழ், 212/13-1 செயிண்ட் மேரிஸ் ரோடு மந்தைவெளி சென்னை-28

संस्कृतविद्यासमिति-पत्रिका

संस्कृतश्रीः

ஸம்ஸ்க்ருதஸ்ரீ:

CC-0. In Public Domain. Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS
Digitized by Muthulakshmi Research Academy
CC-0. Sri Vasudevan Collection, Kolnagar, Chennai.

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

✆ 24951402

ஓ

THE SAMSKRIT EDUCATION SOCIETY (Regd) MADRAS

Old 212/13-1, New No.11, St. Mary's Road, R.A. Puram, Chennai - 600 028.

President : Vaidya Sri S.V. Radhakrishna Sastri

Secretary & Treasurer : Sri G. SITHARAMAN, F.C.A.

Editor and Publisher : S. SRINIVASA SARMA

Samskritasri

34, Senthamil Nagar,
Near : Indra Nagar & New Railway Station
Big Kancheepuram - 631 502
Cell No. 07402763830

பாடங்கள் நடத்துபவர்கள் :

1.	ஸ்ரீமதி சாந்தா ஸ்ரீநிவாஸன்,	ஆழ்வார்ப்பேட்டை	24353597
2.	ஸ்ரீமதி மாலதீ பாலசுப்ரமண்யம்,	மேடவாக்கம்	9884158110
3.	ஸ்ரீமதி சாந்தி அசோக்	மந்தைவெளி	24951402
4.	ஸ்ரீமதி கௌரீ கருணாகரன்,	மைலாப்பூர்	24320544
5.	ஸ்ரீமதி ரமாசுந்தரராஜன்,	சென்னை-95	65687635
6.	ஸ்ரீமதீ பார்வதீ ராமசந்திரன்	அண்ணா நகர்	26215719
7.	ஸ்ரீ R. முத்து கிருஷ்ணன்	கொரட்டூர்	26872430
8.	ஸ்ரீ S. ரங்கநாத சர்மா,	சேலையூர்	22291720
9.	ஸ்ரீமதி புவனேச்வரீ	ராஜகீழ்பாக்கம்	9841212047
10.	ஸ்ரீ K. ராஜேச்வரீ	மாடம்பாக்கம்	9962837319
11.	ஸ்ரீ S. ஹரிஹரன்	நங்கைநல்லூர்	9841403859
12.	ஸ்ரீ S. அனந்தன்	மதுராந்தகம்	9894709418
13.	ஸ்ரீ P.R. சுப்ரமண்யம்	K.K. நகர்	23640864
14.	ஸ்ரீ N. ஜானகீ ராமசாஸ்த்ரீ	I.T.I. கிண்டி	24953144
15.	ஸ்ரீ R. ஸ்ரீநிவாஸகோபாலாசார்ய	ஸ்ரீரங்கம்	2430632
16.	ஸ்ரீமதீ ராஜம் சுந்தர்	திருநெல்வேலி	9488326850
17.	ஸ்ரீ T.V. ஸ்ரீநிவாஸ தாதாசார்ய	காஞ்சீபுரம்	27269153
18.	ஸ்ரீ P.D. ஸ்ரீநிவாஸன்,	திருநின்றவூர்	9445703470
19.	ஸ்ரீ R. ரங்கநாதன்	காஞ்சீபுரம்	97910 55428
20.	ஸ்ரீ C.A. ஏகாம்பரம்	கோயம்புத்தூர்	0422-2233242
21.	ஸ்ரீமதி டி.வி. ஜயலக்ஷ்மி சர்மா, புன்குன்னம், த்ரிசூர்-680 002,		0487-2382964
22.	ஸ்ரீமதி கௌரிவேங்கடராமன், காட்கோபர், மும்பை (E)		09757115154
23.	ஸ்ரீ V. கோதண்டராமன், Mrs. கீதா ரேகா,	ஆதம்பாக்கம், சென்னை	9444469638

Text Composing at : V.K.N. Enterprises, 9840217036

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

संस्कृतश्रीः

मालाः : 38 OCTOBER-2016 पुष्पम् 11

कलि : 5109 दुर्मुखि-तुलामासे 38—11

The Samskrit Education Society Established with the blessings of His Holiness SRI MAHASWAMIGAL of Kanchi Kamakoti Peetam in the year 1957.

OFFICE:

Old 212/13-1, St.Mary's Road, Mandaiveli, Chennai - 600 028.

PRESENT ACTIVITIES

1. Assisting study of Sanskrit.
2. Publication of books and monthly journal SAMSKRITASRI.

SAMSKRITASRI
Founder Editor
Vaidyasri
S.V. RADHAKRISHNA SASTRI,
Hon. Editor.
Dr. N. VEEZHINATHAN

Editor and Publisher
Dr. S. SRINIVASA SARMA

[illegible]
Dr. K. SRINIVASAN,
K.S.R.I. Chennai

Smt. Santa Srinivasan
SES, Chennai

Associate Editors :
Pandit S. Ranganatha Sarma, Chennai
Prof. G. Srinivasu, Kanchipuram
Prof. C.V. Seshadri, Chidambaram

१. श्री काञ्चीकामाक्षीकीर्तनम् ... ४

२. बालबोधः ५

३. मुक्तकमौक्तिकानि।..... ८

४. भाषा।..... ११

५. संस्कृतभाषायां गद्यकाव्यम्।. १६

६. अजपामन्त्रस्वरूपादिकम्।. १९

७. रघुंवशे द्वादशसर्गे २३

8. SANSKRIT PROSODY 27

९. अन्नं न निन्द्यात्।..... ३४

९. करुणामृतम्।..... ३८

१०. ग्रन्थलिपिपरिज्ञानम्..... ३९

SUBSCRIPTION RATES

ANN[illegible] AL[illegible]	Rs. 40/-
LIFE S[illegible] [illegible] SCRIPTION	Rs. 400/-
Page Donation	Rs. 200/-

Subscription and donations may be sent in the form of crossed D.D./Drawn in favour of the Secretary and Treasurer,

"DD/Che[illegible] ue should be sent by Speed Post only"

The Samskrit Education Society [illegible]Regd.[illegible] .
Old 212/13-1, St.Mary's Road, Mandaiveli,
Chennai - 600 028. Ph[illegible] 044-2495 14 02
samskritasri@gmail.com

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

श्री काञ्चीकामाक्षीकीर्तनम्

चिदम्बरम् तञ्ज रामलिङ्ग दीक्षितः, M.A. M.Litt.

रागम्—अमृतवर्षिणी रूपकतालं

पल्लवि

कामाक्षीं मनसा स्मरामि

काञ्चीपुरविलासिनीम् - (का)

अ.पल्लवि

कामेशमनःप्रियकरीं कामितफलप्रदायिनीम्

कामकोटिपीठाधीश्वरीं काव्यालापरसास्वादिनीम्।

चरणम्

आत्मविद्याप्रकाशिनीं आनन्दाऽमृतवर्षिणीं

श्रीचक्रराजजननीं श्रीमत्त्रिपुरसुन्दरीम्।

एकाम्रेशविलासिनीं भवरोगविनाशिनीं॥

रामलिङ्गमखिगानविनोदिनीं प्रभावतीम्॥ - (का)

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

बालबोधः ।

-प्रचार्यः डा.विष्णुपोत्तिः, SCSVMV, कुलपतिः, काञ्चीपुरम्।

अभ्यासार्थमिहोच्यन्ते शब्दाः केचन तादृशाः ।
मृगो नटः करः कूपो मूर्खश्चोरो ग्रहो गजः ।। ३५

बको वरो नटो नक्रश्शूरो देवो वरस्तथा ।
मेघः कालो मयूरश्च मीनश्चापश्च मूषकः ।। ३६

पुंस्याकारगताश्शब्दाः प्रोच्यन्ते विश्वपादयः ।
विश्वपा धनपा हाहा धूम्रपा बलदा तथा ।। ३७

द्वितीयाभूम्नि तेषान्तु रूपं गोपस्तथा भवेत् ।
गोपा गोपाभिरित्येवं गोपे गोपाभ्य इत्यपि ।। ३८

तार्तीयीकं तुरीयञ्च गोपि गोपासु सप्तमी ।
एवं गोपादि शब्दानां रूपभेदो विभक्तिषु ।। ३९

पुंसि चैवमिकारान्ताः कविर्मुनिहरी तथा ।
अरिवह्नी तथा पाणिः नृपतिर्गिरिमरीचिः ।। ४०

पत्या पत्ये तथा पत्युः रूपभेदः प्रकीर्तितः ।
पतिशब्दस्य तत्रास्ति सख्यौ रूपे सखा इति ।। ४१

ईकारान्तगताश्शब्दाः प्रधीस्सुश्रीश्च ग्रामणीः ।
ग्रामण्यां प्रध्यि इत्येवं रूपभेदो निरीक्ष्यताम् ।। ४२

हरिर्वसति वैकुण्ठे हरी देवौ महेश्वरौ ।
हरयस्तु वने सन्ति हरिञ्चोपासते जनाः ।। ४३

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

मानुषस्तु हरीन्हन्ति हरिणा पापमोचनम् ।
हरिभ्यां सह वर्तन्ते क्षीणपापाः सुखं दिवि ।। ४४

स्वयंवरे गतस्तत्र हरिभिस्सह नैषधः ।
हरये नम इत्युक्त्वा सर्वपापात्प्रमुच्यते ।। ४५

हरेर्वयं समुत्पन्नाः दासाश्चैवं हरेर्वयम् ।
हरावस्ति स मुच्येत यस्य भक्तिरनुत्तमा ।। ४६

पितापि गुरुरित्युक्तो देवाचार्यधनौ गरू ।
विनेतारश्च विद्यानां गुरवः परिकीर्तिताः ।। ४७

गुरुं गुरू गुरूनेवं गुरुणा गुरवे तथा ।
गुरोस्तु च गुरावेव मन्तोकारा भवन्ति च ।। ४८

पुंस्येवं भानुरिन्दुश्च साधुर्वायुस्तथा शिशुः ।
शत्रुर्मृत्युस्तरुस्सिन्धुः सूनुरूरुश्च वेणवः ।। ४९

बाहुः पांसुरिषुश्चैवं शम्भुः पशुरिपू तथा ।
मृदुः प्रभुश्च सूनुश्च कर्करेटुश्च बिन्दवः ।। ५०

ऊकारान्तगताः शब्दाः पुंस्येते कथिता बुधैः ।
स्वयंभूः परिभूस्तद्वत् स्वभूस्सुभूस्तथैव च ।। ५१

पिता च पितरौ चैवं पितरं पितरौ तथा ।
पितॄन् पित्रा पितृभ्याश्च पित्रे चैवं पितुः पितुः ।। ५२

पितरीत्यपि सर्वत्र ऋकारान्ताः प्रकीर्तिताः ।
दाता चापि च दातारौ दातारस्तदनन्तरम् ५३

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

तथैवं रूपभेदोऽस्ति दात्रादिषु च कुत्रचित्।
आह्वाने दातरित्येवं रूपं ज्ञेयञ्च बालकैः ॥ ५४

ऐकारं तावदन्ते स्यात् रै शब्दस्य नरीति वै।
रा रायौ राय इत्येवं रूपाणीह भवन्ति च ॥ ५५

ओकारान्ते च गोशब्दो गौर्गावौ गाव इत्यपि।
रूपाणि तत्र ज्ञेयानि औकारान्ते च ग्लौरिति ॥ ५६

(अनुवर्तते)

शत्रौ शातत्रिशूलक्षतवपुषि रुषा प्रेषिते प्रेतकाष्ठां
काली कीलालकुल्यात्रयमधिकरयं वीक्ष्म विश्वासितद्यौः।
त्रिस्रोतास्त्र्यम्बकेयं वहति तव भृशं पश्य रक्ता विशेषा–
न्नो मूर्ध्ना धार्यते किं हसितपतिरिति प्रीतये कल्पतां वः ॥

शातत्रिशूलक्षतवपुषि शत्रौ रुषा प्रेतकाष्ठां यमदिशं प्रेषिते सति अधिकरयमधिकवेगयुक्तं कीलालकुल्यात्रयं रुधिरधारात्रयं वीक्ष्य इतिहासितपतिः काली वः प्रीतये कल्पताम्। इतीति किम्। हे त्र्यम्बक, इयं विश्वासितद्यौः परिचितद्यौ रक्ता रक्तवर्णानुरुक्त

கூரிய த்ரிசூலம் பட்டு நசுங்கிய உடலுடன் பகைவன் மஹிஷன் யமனிடம் அனுப்பப்படுகிறான். அப்பொழுது மிக வேகமாகப் பாய்ந்தோடும் மூன்று ரத்த தாரைகள் அங்கு பெருகின. அதைப் பார்த்த காளிதேவி, ஓ முக்கண்ணரே! பரமேச்வர! தேவலோகத்திற்குப் பரிசயமுள்ள, ரக்த நிறம் கொண்ட (உம்மிடம் ப்ரேமை கொண்ட) இந்த மூன்றெழுக்கு நதியை (கங்கையை) பார்த்து, உமது தலையில் நன்றாக தாங்கலாமே - என்று சொல்லி பர்த்தாவை கிண்டல் செய்தாள். அந்த காளிகாதேவி உங்களது மகிழ்ச்சிக்கு காரணமாக ஆகட்டும்.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

मुक्तकमौक्तिकानि ।

—श्रीसुन्दरराजः, I.A.S. (Retd.,) भुवनेश्वरम् ।

भावदर्शिनी बाला

बाला केयं कज्जलपक्ष्मा श्लक्ष्णेनाक्ष्णा दर्शितभावा ।
रागं स्वगिरा किरती मधुरा लोला तालैर्नूपुरशब्दैः ॥

चम्पकान्योक्तिः

रे रे चम्पकवृक्ष पुष्पितशिखो भास्येवमुच्चावचः
तिष्ठन्नन्यकृते सुमं त्ववितरन् व्यर्थं किमर्थं वद ।
देवालङ्करणाय पूजनकृते चाप्राप्य दूरे हि तत्
धम्मिल्ले धरणाय यन्मृगदृशां नामोददानाय सत् ॥

श्रीतातपादैः प्रचोदितस्येव कवेः श्लोकः

करधृतनवनीतं नर्तने वर्तमानं
कनकरुचिरलक्ष्मीं बिभ्रतं विभ्रमेण ।
मणिभिरगणितैराकल्पिनं कल्पवृक्षं
मनसि वचसि चाक्ष्णि न्यस्य नित्योऽस्मि भृत्यः ॥

कालिन्दी कस्य हेतोः प्रवहति?

इतः कालिन्दीयं सलिलमिदमस्याः शिशिरयत्
इतस्तस्यास्तीरे पुलिनमपि पुण्यं सुविमलम् ।
यतः कृष्णः पूर्वं कृतविहरणस्संतरणकृत्
गतं मृग्यन्ती सा हरिविरहिता किं प्रवहति ॥

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

विशृङ्खलितभटविषयकः

विशृङ्खलभटा यथाविधि न कर्म ते कुवते
परिस्थितिरतर्किता भवति तेन दुःखप्रदा।
परीक्षितगुणागुणाः कठिनकर्म कर्तुं क्षमाः
सुशिक्षितभटा हि ये नृपनियुक्तिमर्हन्ति ते॥

कन्याभेदाः

काश्चित् पित्रोरधीनाः पितृवचनवशाः शान्तदान्तप्रशान्ताः
काश्चित् कामैकलोलाः कथमपि यतमाना निजं काममाप्तुम्।
काश्चित् दुष्टा नितान्तं पितुरनभिमते कर्म तत् तत् दधानाः
काश्चित् पुंश्चल्य एव प्रतिपुरुषदृशः सन्ति कन्या विभिन्नाः॥

तां कथं यामि हित्वा?

मदपिबमधुना मां मादयन्तीं दृशैव
मधुरमृदुलदोष्णा दापयन्तीं शरावम्।
मदनसदनवेदीमिंगितैस्सूचयन्तीं
प्रियसख वद मत्वा तां कथं यामि हित्वा॥

मृत्युंजयोपदेशः

मृत्युंजयोपदिष्टो यः मृत्यावुपतिष्ठति।
श्रीरामजयमन्त्रो नः शत्रून् दहति देहिनाम्॥

कामदहने कवेरापत्तिः

निरीक्ष्य सोऽक्ष्णा परितः क्षणेन तनोति यस्स्म स्मरमेकभस्म।
संसाधयिष्यत् सुरकार्यमार्यं घ्नतः पुरस्तात् धिगमुष्य धैर्यम्!॥

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

कुमारसंभवस्संज्ञयापनः

कुमारसंभवकृते पार्वत्यन्तः प्रवेष्टुमुद्दिष्टम्
तारकमारकमोजः मारस्याभून्मारकं शम्भोः ॥

कुमारजननं

विष्णुकुमारं मारं ह्रुष्ट्वा प्राप्तुं कुमारमपरं किम् ?
माराधिसुकुमारं सुब्रह्मण्यं कुमारमयतिष्ट ॥

पयोधरनितंबयोः परस्परसंबंधः

परस्परेण संबंधः पयोधरनितंबयोः ।
नितम्बान् भूधराणां यत् संश्रयन्ते पयोधराः ॥

के तु सुरापाः के न्वसुरापाः

सुरवाण्यां सुरापास्तु गण्याः पुण्यजना भुवि ।
असुरापा भवन्त्योड्र्यां जघन्याः केऽपि जन्तवः ॥

तेन किं बहवो जाताः सुरापाः श्रोत्रिया अपि ।
ओड्रियाः ब्राह्मणास्सन्तः कामपालकलालिताः ॥

देयमार्तस्य शयनं स्थितश्रान्तस्य चासनम् ।
तृषितस्य च पानीयं क्षुधितस्य च भोजनम् ॥

நோயாளிக்குப் படுக்கையும், (வெகு நேரம்) நின்று களைத்தவனுக்கு இருக்கையும், நாவரண்டவனுக்கு குடிநீரும், பசித்தவனுக்கு உணவும் கொடுக்கத்தக்கது.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

भाषा।

—मधुकरः।

देश भाषा। । इयमभिवर्धनीया। इच्छन्नपि क इमामुपेक्षितुं अज्ञातुं वा शक्नुयात्? एकैकः इमां शैशवात्प्रभृति शिक्षते। स्वदेशे परस्परं व्यवहारः अनयैव प्रवर्तते। तस्मादस्या अभिवर्धने न कस्यचित् विप्रतिपत्तिलेशोऽपि भवितुमर्हति।

राष्ट्रभाषा। हिन्दीति हिन्दुस्थानीति च इमां व्यवहरन्ति। अस्यां परिचयं विना राज्यतन्त्रे प्रवेशो दुर्लभः स्यात्। अखण्डस्य भारतदेशस्य योगक्षेमनिर्वाहेऽपि हि द्रमिडदेशवासिभिरपि अवश्यमस्याः परिचये श्रद्धातव्यम्।

लोकभाषा। इयमाङ्गली। विदेशीयैस्समागमोऽस्माकमवर्जनीयः संवृत्तः। एको देशः देशान्तरजनैः सम्पर्कं विना स्वयमेव स्वव्यवहारं सर्वं वर्तयतीत्येतत् अस्मिन्काले दुष्करमभूत्। गतिसाधनैः युद्धसाधनैः संभाषणसाधनैः वाणिज्यवृत्तिविशेषैश्च यथाकथञ्चित् एकैकस्यापि देशस्य सर्वलोकसम्बन्धिषु व्यवहारेषु भागिता बलादापतति। तस्मादेतदुपयोगिनी अत्रत्यैश्चिरादभ्यस्ता आङ्गल्यपि सहसा उपेक्षितुं न शक्यते।

एवं तिसृषु भाषासु अवश्यं परिचेयासु चतुर्थस्य संस्कृतस्य कावकाशः?। यद्यपि प्रकटं न वदन्ति तथापि बहूनामस्ति मतिः यदि संस्कृतं नश्येत् न कापि हानिस्तेन लोकस्य भवेदिति। तथा च चतुर्थ्या अस्या भाषायाः परिचयः बालानां वृथा क्लेशदायीति इमां कलाशालासु पाठ्यपट्टिकायाः बहिष्कर्तुमिच्छन्ति।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

अभिज्ञैः तेषां प्रतिबोधनं कर्तव्यम्। देशभाषाणां संस्कृतस्य चातिघनिष्ठः सम्बन्धः वर्तत इति प्रत्यक्षमेव। संस्कृतस्य नाशे देशभाषाऽपि नष्टा एव। संस्कृतमनादृत्य देशभाषाभिवर्धनं शक्यं कर्तुमिति मनोरथमात्रमेतत्। संस्कृतानभिज्ञस्य देशभाषापण्डितस्य, तदभिज्ञस्य देशभाषापण्डितस्य च महदन्तरं प्रत्यक्षमीक्ष्यते। देशभाषास्वरूपं यद्यपि संस्कृतात् भिन्नं तथापि देशभाषानिबद्धग्रन्थप्रतिपाद्या विषयाः सर्वे प्रायेण संस्कृतग्रन्थप्रतिपाद्या एव। एतदुपजीवनेन प्रतिपादिता वा। अतस्तेषां स्फुटप्रतिपत्तये सन्देहनिवारणाय च संस्कृतग्रन्थपरिचयोऽवश्यापेक्षितः। कम्बरामायणसूक्ष्मार्थाः वाल्मीकिरामायणवेदिनां सुग्रहा भवन्ति, न तथा केवलद्रविडपण्डितानाम्॥ 'तोल्काप्पियम्' इत्यस्मिन्प्राचीन-द्रविडव्याकरणग्रन्थे संस्कृतज्ञैरेव ज्ञातुं योग्याः (शक्याः) तज्ज्ञानविरहेण केवलद्रविडैरगृहीताः बहवः सूक्ष्मार्थाः अद्यापि गूढा वर्तन्ते। 'तिरुक्कुरल्' ग्रन्थस्य वेदत्वेन द्रविडैः पूज्यमानस्य प्राचीनस्य तात्पर्यमद्यापि प्रायोऽगृहीतमेव। संस्कृतज्ञानसम्पन्नैरेव तदुपलम्भः शक्यः। तस्माद्देशभाषाभक्तैरवश्यमेव संस्कृतभक्तैरपि भाव्यम्। द्वे इमे अस्माकं चक्षुषी तत्त्व ज्ञानसम्पादनाय। संस्कृतं देशभाषा च। यथा एकस्य पीडा न युज्यते तथाऽपरस्यापि। एकत्र द्वेषः उभयद्रोह एव पर्यवस्यति।

प्राचीनाः देशभाषाग्रन्थनिर्मातारः ये केचिदपि न संस्कृतद्वेषिण आसन्। प्रत्युत तस्मिन् परमं गौरवं बिभ्रतः तदनुसारेणैव स्वग्रन्थान् निरमिमत। एवं सति एषु पक्षपातेन

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

मूलद्वेषिणो यदि भवेम, एभ्यो ग्रन्थकारेभ्य एव द्रोहमाचरितवन्तो भवेम' इति निरूपकैविभाव्यम्।

एवमपि एकैको बालः कथं भाषाचतुष्टयमधीयीत? न हि बालानां बुद्धिः एतावन्तं श्रमं सहिष्यते। अतिपीडा हि एवं कृता भवेत् इति बहवः बिभ्यति। अस्थाने इयं भीतिः। नायमतिभारो बालानाम्। अगत्या तावति श्रमे कर्तव्ये आपतिते, कालक्रमेण श्रमबुद्धिरपेयात्। भाषाचतुष्टयमपि अनायासेन परिचेष्यन्ति इति केचिदत्र समादधति। देशान्तरे चतसृणां भाषाणां परिचयोचितं संविधानं बह्वीषु कलाशालासु कृतमस्तीति च वदन्ति।

वयं तु ब्रूमः। द्राविडीप्रभृतिषु देशभाषासु तत्तद्देशे जातानां परिचयः अयत्नसिद्धो भवति। आरम्भविद्यायां पञ्चकक्ष्यावधि च उपाध्यायमुखात् शिक्षा भवति। एवं लेखन-भाषणोपयुक्तायां देशभाषाव्युत्पत्तौ समीचीनायां सर्वेषां सम्पन्नायां मध्यमोत्तमपर्वणोः विशेषपरिचयः कस्या भाषाया भवतु इति विमर्शे यद्यपि एकैकेन बालेन देशभाषा-संस्कृतमित्युभयत्र विशेषपरिश्रमः कर्तुं न शक्यः; तथापि इच्छया कैश्चिद्देश भाषायां कैश्चित् संस्कृते इति परिश्रमविभागः कार्यः। तेन भाषाद्वयमपि सुरक्षितमभिवर्धितं च भविष्यति। सति सौकर्ये, कालान्तरे देशभाषाध्यायिभिः संस्कृतं, संस्कृताध्यायिभिः देशभाषां च परिचित्य विज्ञानपरिपाकश्च सम्पादयितुं शक्यते। यथा कथंचित् संस्कृतं यथा न विनश्येत्, तदध्ययने बहूनामुत्साहो भवेत् तथा संविधानं राज्यधुरन्धराणां धर्मः। यस्य अपरिपालने दृष्टोऽदृष्टश्च प्रत्यवायोऽतिमहान् भवेत्। विशिष्य भारतस्य

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

उत्कृष्टधर्मानुबन्धिन एव, देशान्तरेभ्यः समुन्नतिस्समञ्जसा सेत्स्यति। महान्तः अस्मद्देशनेतारः श्री विवेकानन्द - महर्षि अरविन्दघोष - गान्धी - नेहरूप्रभृतयोऽपि सहमता एवासन् अस्मिन्विषये। एवं तत्त्वबोधनं संस्कृताभिज्ञानां विदुषां धर्मः। औदासीन्यं विना तत्र तत्र मिलित्वा विषयं विशदमुपपाद्य सर्वेषां जनानां तद्वारा विद्याधिकारिणां च दृष्टिरस्मिन्विषये अविलम्बेन आकृष्टव्या। भवाम शरदः शतम्, शृणवाम शरदः शतम्, प्रब्रवाम शरदः शतम्, अजीताः शरदः शतम्!॥

वेदैरशेषैर्विविधैश्च शास्त्रैः संस्तूयमानो जगदेकचक्षुः।
अखण्डविश्वप्रसृतप्रभावः तनोतु पूषा जगतः शुभानि॥

--कस्यापि।

न रणे विजयाच्छूरोऽध्ययनान्न च पण्डितः।
न वक्ता वाक्पटुत्वेन न दाता चार्थदानतः॥

इन्द्रियाणां जयाच्छूरः पण्डितो धर्मचर्यया।
हितप्रियोक्तिभिर्वक्ता दाता संमानदानतः॥

போரில் வெல்வதால் சூரனல்ல. கற்பதால் பண்டிதனல்ல. பேசும் திறமையால் பேச்சாளனல்ல. பொருள் வழங்குவதால் கொடையாளியல்ல.

புலன்களை வெல்வதால் சூரன். நேர்மையுடன் நடப்பதால் பண்டிதன். இதமாக இன்புறும்படி பேசுவதல் பேச்சாளன். மகிப்ப கருவதால் கொடையாளி.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

समत्ववादस्य प्रवर्तकः कार्ल् माक्र्स् महाशयः १८५३ तमे वर्षे 'न्यू-यार्क्-डैली ट्रिब्यून्' इत्यस्यां आङ्ग्लपत्रिकायां कांश्चन स्वकीयान् लेखान् प्राकाशयत् तत्रैकस्मिन् एष विषयः दृश्यते—

'आङ्गलेयानामाधिपत्यात् (तदानीं) भारतदेशस्य पुरातनतत्त्वानि प्राचीनाचाराश्च तिरोधानं गच्छन्ति। एतेन भारतीयानां प्राक्तनं पावनचरित्रं विच्छिन्नं भवति। 'भारतदेशे गुणकर्मविभागश एव वर्णास्समकल्प्यन्त। भारतीया जनाः निसर्गशान्ताः परस्परं स्निग्धाश्च वसन्ति। तत्र अधमवर्णेष्वपि विनयः, शान्तिः, सन्तुष्टिश्च दृश्यन्ते।

'अस्माकं भाषाणां मतानां च भारतदेश एव मूलम्। भारतदेशे क्षत्रियाः (तदानीम्) पराक्रमे पुरातनैः जर्मन्देशवासिवीरैः सदृशाः। ब्राह्मणाः प्रतिभाविलासे प्राचीनान् ग्रीकृज्ञानिनोऽपि अतिशेरते।

'एतादृशमहत्त्वभारतं भारतं पुनरपि उत्कृष्टां दशां समधिगमिष्यतीति मे विश्वासः निश्चयश्च' इति।

—स्वप्नप्रायोऽयं विषयः इदानीं प्रतिभाति ऋते ईश्वरानुग्रहात्।

दीनो मा भूः अलसो मा भूःमानी मानय मान्यान् महितान्।
दुर्व्यसनानां वशगो मा भूः कुलमर्यादां रक्ष यथावत्॥

இளைத்தவனுயும், சோம்பித் திரிபவனுயும் ஆகாதே! தன்மானம் கொண்டிரு! மதிக்கத் தகுந்த சான்ருேனர் மதித்து நட! கெட்ட உனர்ச்சிகளுக்கு ஆட்படாதே! குலத்தின் கௌரவத்தை தக்கபடி பாதுகாத்து நடந்துகொள்! —நல்வழிப்பாட்டு

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

संस्कृतभाषायां गद्यकाव्यम्। *(अनुवर्तते)*

——मधुकरः।

एवमुपर्युक्तैः अतिगुरुभिः कृत्रिमैर्नियन्त्रणैः संस्कृते गद्यकाव्यं कथमपि भवितुमनर्हं अभवत्। अस्य कण्ठस्थीकरणवार्तापि दूरे अपास्ता समजनि। किं च, वैद्यक-ज्योतिष-सङ्गीत-पौरोहित्यादिषु सद्यः सुलभलाभदायिषु शास्त्रेषु समयोचितविषयाणां शीघ्रमुपस्थानाय गद्यं सर्वथानुपयुक्तं भूत्वा पद्यमेवाश्रणीयमभवत्। अमरकोशादयोपि कण्ठस्थीकरणसौकर्याय छन्दोनिबद्धा बभूवुः। शिलाशासनादिष्वपि काव्यनिर्माणकौशलं प्रकटीकर्तुमिव पद्यसरणिमेव श्लाघ्यममन्यन्त अस्मत्पूर्वजाः।

आध्यात्मिकेष्वपि विवादेषु विविधवादसरणीनां संग्रहार्थं सङ्ग्रहश्लोकास्सर्वत्र नियमेन दृश्यन्ते। अध्यात्मवादः वस्तुतः दिव्यां काव्यशक्तिं सङ्कुचितां करोति वा? नैवं भवितुं (अथवा संभावयितुं) शक्यम्। यतः अस्मद्देशे अध्यात्मवादः धर्मः इत्युभौ अपि साहित्यशास्त्रस्य विविधेष्वपि भागेषु स्वीयं सर्वङ्कषं प्रभावं साकल्येन प्रकटयामासतुः। यूरोपीय - साहित्येष्विव अस्मद्देशीयनाटकेषु महाकाव्येष्वपि विषादान्तत्वं कालक्रमेण प्रतिषिद्धमभवत्। वस्तुतत्त्वे विचार्यमाणे तु अस्माकं काव्यानामादर्शभूते द्वे अपि रामायण-महाभारते विषादान्ते एव विद्येते। रामायणस्य सीतात्यन्तवियोगपर्यन्तत्वं समीक्षकेणानन्दवर्धनाचार्येण ध्वन्यालोके सोपपत्ति निरूपितं

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

दृश्यते। महाभारतस्य विषये तु न कस्यचन विमतिरस्मिन्विषये।

इदमेकमवधेयं भवति — यत् गद्यग्रन्थानां लेखनं विना संरक्षणं दुस्साधमिति। पद्यग्रन्थानां तु कण्ठपाठसौलभ्येन लेखनमन्तरैव सङ्गोपनं न दुःखावहमासीत्। वैदिकग्रन्थाः पुस्तकलेखनं अपवित्रमिति नानुमन्यन्ते। बहोःकालात्परमेव अर्वाचीनतमे हरिवंशे अन्यत्र पुराणेषु च पुस्तकदानस्यापि प्राशस्त्यमाद्रियते। अन्यभाषा- लिप्यपेक्षया देवनागरीलिपिः लेखनाय कष्टसाध्या वर्तते। अतः सर्वत्रापि देशभाषास्वेव लेखनप्रथा क्रमशः सर्वसम्मता संदृश्यते। इत्थं च व्यवहारोपनता भाषा लिखितपुस्तकस्थभाषायाः दूरदूरं गमिता। एष भेदः गद्यकाव्यस्य अवनतेः मुख्यतमं कारणं अभवत्। भरतादयः नाट्यशास्त्रप्रणेतारः कृतविद्यानां ब्राह्मण-राजर्षिप्रभृतीनां संस्कृते व्यवहारं नाटकेषु प्रकल्पयन्ति। अकृतविद्यानां स्त्रीणां च प्राकृतादिभाषास्वेव व्यवहारमाज्ञापयन्ति। इत्थं गद्यकाव्यचरितस्य दुर्दशा वरीवर्ति। प्राचीनमतरीत्या संस्कृते गद्यकाव्यप्रणेतारः पञ्चषाः बाणभट्ट-दण्डि -सुबन्धु-प्रभुखा एव। सरलं तु गद्यं अतिप्रयत्नेन सम्पादितं नाटकेषु, हितोपदेशे, पञ्चतन्त्रे भगवतः पतञ्जलेर्महाभाष्ये, श्रीशङ्करभगवत्पादानां ब्रह्मसूत्रभाष्ये वा कदाचिदुपलभ्येत।' अत्र च कारणं सुगममेव। एते महात्मानः सामान्यजनानुद्दिश्य ग्रन्थरचनां चक्रुः। तथा च गुरु-शिष्यसंवादरूपां शैलीमुररीकृत्य स्वीयानभिप्रायान् जनविदितान् जनप्रियांश्च चक्रुः। इयं च शैली अन्यासु भाषासु उपलभ्यमानया गद्यशैल्या साम्यं भजेत। एतादृशानि गद्यकाव्यानि

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

रचयितुमाधुनिकाः केचित् काव्यकर्तारः प्रयेतिरे। तेषु अग्रगण्या एते—

१. महामहोपाध्यायः रायम्पेट्टैR.V. कृष्णमाचार्यः — कादम्बरी सङ्ग्रहकर्ता।

२. मद्रनगर्यां प्रेसिडेन्सिकलाशालाप्राध्यापकः K.L.V. शास्त्री योऽयं कालिदासीयनाटककथामञ्जरीकर्ता। उभयोरनयोः गद्यकाव्ये अतिप्रसिद्धे, सर्वासु उच्चकलाशालासु पाठ्यग्रन्थतया बहुवर्षपर्यन्तमास्ताम्।

३. महामहोपाध्ययस्य लक्ष्मणसूरेः भीष्मविजयः तथा महाभारतकथासारश्च अतिप्रसिद्धौ।

४. प्राचार्यवासुदेवन् इलयत् इत्यनेन कृतः मृच्छकटिक-कथासङ्ग्रहः - केरलकलाशालासु पाठ्यग्रन्थतया समादृतः।

५. अण्णामलैसर्वकलाशालाभूतपूर्वाचार्यः Y. महालिङ्गशास्त्री M.A.,B.L. इत्यनेन कृतः भासनाटककथासारः।

६. द्वित्रवर्षेभ्यः पूर्वमस्मत्संस्कृत श्रीपत्रिकायां प्रकाशितः विदुष्या गौर्या (वेङ्कटरामेण) भासनाटक-उत्तररामायणसारश्च। एते सर्वेऽपि प्राचार्याः दाक्षिणात्याः। उत्तरभारतीया अपि कतिचित् आसन् इति श्रूयते।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

अजपामन्त्रस्वरूपादिकम्।

—निष्टल-सुब्रह्मण्यशास्त्री, पोन्नूरु, गुण्टूरु।

अजपागायत्र्या हंसतत्त्वात्मकत्वात् ज्ञेयं बहु वर्तते। सर्वे मन्त्राः दान्ताय गुरुभक्ताय दातव्या इति सामान्य नियमः। काष्ठेषु अग्निरिव, तिलेषु तैलमिव देहेषु व्याप्य तिष्ठति। गुदमवष्टभ्य मूलाधारात्प्राणवायुमूर्ध्वं नीत्वा क्रमशश्चक्राणि क्रान्त्वा विशुद्धौ प्राणवायुं संस्थाप्य ब्रह्मरन्ध्रे ध्यायेदिति। हंसस्य नादे विलयनात्तुरीयातीतावस्था भवति। अहोरात्रयोः षट्छताधिकान्येकविंशतिसहस्राणि जीवो जपं कुरुते। एतादृशस्य जपस्य कोट्या नादानुभवो भवति। चिणिः - चिणिचिणिः - घण्टानादः - शङ्खनादः - तन्त्रीनादः - तालनादः - वेणुनादः - भेरीनादः - मृदङ्गनादः - मेघनादः इति दशविधनादा भवन्ति। तत्तन्नादानुभवेषु भिन्नभिन्ना अनुभूतयश्चापि साधकैरनुभूयन्ते। ब्रह्मणि मनसो लये सङ्कल्पविकल्पादिकं पुण्यपापे च नश्यन्ति। मोक्षानुभूतिश्च भवितेति सिद्धान्तः। मूलाधारे षट्छतं, स्वाधिष्ठानमणिपूरानाहतेषु षट्सहस्रसङ्ख्यया अविशिष्टेषु त्रिषु चक्रेषु सहस्रतया समर्पण साधकैः क्रियते।

हंसमन्त्र एव अजपा गायत्री भवति। एतज्जपसदृशः नास्त्यन्यो जप इत्यपि ध्यानबिन्दौ। तद्यथा—

'अजपा नाम गायत्री योगिनां मोक्षदा सदा
अनया सदृशी विद्या अनया सदृशो जपः।
अनया सदृशं पुण्यं न भूतं न भविष्यति।' ॥

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

हंसस्य स्थाननिर्देशोऽपि कृतः शास्त्रकृद्भिः । द्वयोर्नेत्रयोर्मध्यस्थानमेव हंसस्य स्थानमिति निर्दिष्टम्। सकारस्य खेचरीत्वं, जीवस्थानीयत्वात्त्वं पदार्थत्वं हस्य तत्पदवाच्यत्वमीश्वरत्वं च प्रत्यपादिषाताम् । एतेन जीवेशयोरभेदत्वरूपमद्वैतमत्र स्फुटं प्रतिभाति । तद्यथा योगचूडामणौ—

'जाग्रन्नेत्रद्वयोर्मध्ये हंस एव प्रकाशते
सकारः खेचरी प्रोक्ता त्वंपदं चेति निश्चितम्
हकारः परमेशः स्यात्तत्पदं चेति निश्चितम्।'

यद्यपि साधारणश्चाजपागायत्री साधनविशेषस्समेषां तथापि सन्यासिनां मोक्षकाङ्क्षिणां विशेषतश्चोपयुज्यते । धैर्यकन्था, उदासीनकौपीनं हंसाचार इत्यादि लक्षणानि प्रतिपादयन्त्या श्रुत्या अजपागायत्र्या अवश्याचरणीयत्वमुक्तम् । तथा च निर्वाणोपनिषदि।

'परेश्वरसत्ता सत्यसिद्धयोगो मतः अमरपदं न तत्स्वरूपम्, आदिब्रह्मस्वसंवित्, अजपागायत्री' इति । अत्र देवता अद्वैतसदानन्द एव।

महायोगे च अन्तर्भूमिकाः विद्यन्ते चतुर्था । तद्यथा — मन्त्रः लयः हठः राजयोग इति । जीवश्च हकारेण बहिरागमनं सकारेण पुनः प्रवेशं च कुरुत इति । एवञ्च सर्वजीवेषु साधारणी प्रक्रिया । गुरुवाक्याद्गुर्वनुग्रहाच्च सुषुम्नायामेष जपो विपरीतस्सन् मन्त्रयोगरूपेण परिणमते । हकारस्य सूर्यस्थानीयत्वं सकारस्य चन्द्रस्थानीयत्वम्, तयोरैक्यं यदा क्रियते तदा हठत्वसिद्धिरिति । तथा च योगशिखायाम् —

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

'हकारेण तु सूर्यस्स्यात्सकारेणेन्दुरुच्यते।
सूर्याचन्द्रमसोरैक्यं हठ इत्यभिधीयते'

गायत्र्यां त्रयोविंशाक्षरस्य अधिदेवता हंसः। हंसोपासनं च सूर्योपासनमेवेति। अत एव हंसपरमहंसशब्दव्यवहारश्च-सन्यासिष्विति ज्ञेयं भवति। एतत्साधनेन अज्ञाननिर्माल्यत्यागः सोऽहंभावपूजा च क्रियेते। तदुक्तं श्रुतिषु—

'देहो देवालयः प्रोक्तो जीवो देवस्सनातनः
त्यजेदज्ञाननिर्माल्यं सोऽयंभावेन पूजयेत्' इति।

परमं ब्रह्मैव हंसरूपेण श्रुतिषु प्रतिपादितं दृश्यते। तद्यथा—

'हंसश्शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्।
नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत्॥'

सर्वेषां मनूनामिव हंसमनोरपि गायत्री शास्त्रेषु निश्चिता। आत्मैकस्य ऋषिः। करन्यास-हृदयन्यासादिकं साधारणमेव। ध्यानं च इत्थं प्रतिपादितम्—

'गमागमास्तं गगनादिशून्यं चिद्रूपदीपं तिमिरापहारम्।
पश्याम्यहं सर्वजनान्तरस्थं नमामि हंसं परमात्मरूपम्'॥

एतदुपासनया देहेन्द्रियातिरिक्तात्मभावनासिद्धिः फलमिति वेदितव्यम्। यथा चोक्तं श्रीशङ्करभगवत्पादाचार्यैः

'नाहं देहो नेन्द्रियाण्यन्तरङ्गं नाहङ्कार; प्राणवर्गो न बुद्धिः
दारापत्यक्षेत्रवित्तादिदूरः साक्षी नित्यस्सच्चिदात्मा शिवोऽहम्'

इति शम्॥

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

रघुंवशे द्वादशसर्गे

सप्तमः श्लोकः

पित्रा दत्तां रुदन् रामः प्राङ् महीं प्रत्यपद्यत ।

पश्चाद्वनाय गच्छेति तदाज्ञां मुदितोऽग्रहीत् ।।

पदच्छेदः — पित्रा दत्तां रुदन् रामः प्राक् महीं प्रत्यपद्यत पश्चात् वनाय गच्छ इति तदाज्ञां मुदितः अग्रहीत् ।।
(१४ पदानि)

शब्दधातुरूपाणि

पित्रा - पित्रा पितृभ्यां पितृभिः - ऋका.पुं.तृ.एक ।

दत्तां - दत्तां दत्ते दत्ताः - आका.स्त्री.द्वि.एक ।

रुदन् - रुदन् रुदन्तौ रुदन्तः - एका.पु.प्र.एक ।

रामः - रामः रामौ रामाः - अका.पु.प्र.एक ।

प्राक्, पश्चात्, इति - अव्य

महीं - महीं मह्यौ महीः - ईका.स्त्री.द्वि.एक ।

प्रत्यपद्यत - प्रत्यपद्यत प्रत्यपद्येतां प्रत्पद्यन्त प्रति इत्युपसर्गपूर्वक 'पद गतौ' धातोः लङ्.प्र.पु.एक ।

वनाय - वनाय वनाभ्यां वनेभ्यः - अका.पु.चतु. एक ।

गच्छ - गच्छ - गच्छतात् गच्छतं गच्छत 'गम्लृ गतौ'

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

धातोः लोटि.म.पु. एक।

तदाज्ञां - आज्ञां आज्ञे आज्ञाः - आका.स्त्री.द्वि.एक।

अग्रहीत् - अग्रहीत् अग्रहीष्टां अग्रहीषुः। ग्रह उपादाने इति धातोः - लुङि. प्र.पु.एक।

प्रतिपदार्थः - रामः - ராமர், प्राक् - முதலில், पित्रा - தந்தையால், दत्तां - தரப்பட்ட, महीं - பூமியை, रुदन् - அழுது கொண்டே, प्रत्यपद्यत - ஏற்றார். पश्चात् - பிறகு, वनाय - காட்டிற்கு, गच्छ - செல், इति - என்று, तदाज्ञां - அவரது ஆணையை, मुदितः =- சந்தோஷ முள்ளவராக, अग्रहीत् - ஏற்றார்.

व्याकरणविशेषः

तदातां - तस्य आज्ञा। ताम्।

भावार्थः - आदौ रामः पितृदत्तं राज्यं कृच्छ्रेण अङ्गीचकार। 'वार्धके मुनिवृत्तीनाम्' इति पूर्वोक्तप्रकारेण दशरथेन अरण्यं गन्तव्यमिति हेतोः तद्वियोग दुःखितः आसीत्। अनन्तरं वनं याहि इति दशरथनिदेशं (पित्राज्ञाकरणं) लाभबुद्ध्या सन्तुष्टः सन् प्रतिजग्राह।

कोषः

'गोत्रा कुः पृथिवी पृथ्वी क्ष्मावनिर्मेदिनी मही'

'अटव्यरण्यं विपिनं गहनं काननं वनम्'

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

अष्टमः श्लोकः

दधतो मङ्गलक्षौमे वसानस्य च वल्कले।

ददृशुः विस्मिताः तस्य मुखरागं समं जनाः ॥

पदच्छेदः - दधतः मङ्गलक्षौमे वसानस्य च वल्कले ददृशुः विस्मिताः तस्य मुखरागं समं जनाः ॥ (११ पदानि)

शब्दधातुरूपाणि

दधतः - दधतः दधतोः दधतां - तका.पु.ष.एक

मङ्गलक्षौमे - क्षौमं क्षौमे क्षौमानि - अका.नपुं.द्वि.द्वि.।

वसानस्य - वसानस्य वसानयोः वसानानां - अका.नपुं.ष.एक।

च, समं - अव्य

वल्कले - वल्कलं वल्कले वल्कलानि - अका.नपुं.द्वि.द्वि।

ददृशुः - ददर्श ददृशतुः ददृशुः - 'दृशिर् प्रेक्षणे' इति धातोः लिटि.प्र.पु. बहु।

विस्मिताः - विस्मितः विस्मितौ विस्मिताः - अका.पु.प्र.बहु।

तस्य - तस्य तयोः तेषां - दका.पुं.ष.एक।

मुखरागं - रागं रागौ रागान् - अका.पुं.द्वि.एक।

जनाः - जनः जनौ जनाः - अका.पुं.प्र.बहु।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

प्रतिपदार्थः - मङ्गलक्षौमे - மங்களமான இருண்டு பட்டு வஸ்திரங்களை, दधतः - தரிப்பவரும், वल्कले - இரு மரவுரிகளை, वसानस्य च - உடுத்துபவருமான, तस्य - அந்த ராமருடைய, मुखरागं - முகத்தின் சாயலை, समं - ஒரே நிலையுள்ளதாய், जनाः - மக்கள், विस्मिताः - வியப்புடையவர்களாய், ददृशुः - கண்டனர்.

व्याकरणविशेषः

मङ्गलक्षौमे - मङ्गले च ते क्षौमे च। ते।

मुखरागं - मुखस्य रागः। तम्।

कोषः - 'वल्कं वल्कलमस्त्रियाम्' 'क्षौमं दुकूलं स्यात्'

भावार्थः - पट्टाभिषेकार्थं दुकूलवस्त्राणि धृतवतः पश्चात् वनवासनिमित्तं वल्कवाससी च धरतः सर्वलोकातिगस्य रामस्य चित्तविक्रिया नैवासीत्। तथाभूतं रामं वीक्ष्य साकेत वासिनः जनाः आश्चर्यचकिताः बभूवुः।

--R. रङ्गनाथशर्मा, सं.वि.स. काञ्चीपुरम्।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

(२) गजगति.

Def. नभलगा गजगतिः ।

Sch G न, भ, ल, ग (४.४)

ex. रविसुतापरिसरे विहरतो दृशि हरेः ।
व्रजवधूगजगतिर्मुदमलं व्यतनुत ।।

(३) प्रमाणिका.

Def. प्रमाणिका जरौ लगौ ।

Sch. ज, र, ल, ग (४.४)

Ex. पुनातु भक्तिरच्युता सदाच्युतांघ्रिपद्मयोः ।
श्रुतिस्मृतिप्रमाणिका भवाम्बुराशितारिका ।।

(४) माणवकः

Def. भात्तलगा माणवकम् ।

Sch.G. भ, त,ल,ग, (४.४)
चंचलचूडं चपलैर्वत्सकुलै; केलिपरम् ।
ध्याय सखे स्मेरमुखं नंदसुतं माणवकम् ।।

(५) विद्युन्माला.

Def. मो मो गो गो विद्युन्माला ।

म,म,ग,ग, (४.४.)

Ex. घासोवल्ली विद्युन्माला बर्हश्रेणी शाक्रश्चापः ।
यस्मिन्नास्तां तापोच्छित्यै गोमध्यस्थःकृष्णांभोद. ।।

(६) समानिका.

Def. रजौ गलौ समानिका तु ।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

Sch G र, ज, ग, ल (४.४)

Ex. यस्य कृष्णपादपद्ममस्ति हृत्तडागसद्म ।
धीः समानिका परेण नोचितात्र मत्सरेण ।

Metres with 9 Syllables in a quarter.

(बृहती)

(१) भुजगशिशुभृता.

Def. भुजगाशिशुभृता नौ मः ।

Ex. न, न, म (७.२)

Sch.G. हृदतटनिकष्टक्षौणी भुजगशिशुभृता याऽसीत् ।
पुररिपुदलिते नागे व्रजजनसुखदा साऽभूत्।

(२) भुजंगसंगता.

Def. सजरैर्भुजंगसंगता ।

Sch. G. स, ज, र (३.६)

Ex. तरला तरंगिरिंगितैर्यमुना भुजंगसंगता ।
कथमेति वत्सचारकश्चपलः सदैव तां हरिः ।

(३) मणिमध्य.

Def. स्यान्मणिमध्यं चेद्भ्रमसाः ।

Sch, G. भ,म,स (5. 4.)

Ex. कालियभोगाभोगगतस्तन्मणिमध्यस्फीतरुचा ।
चित्रपदाभो नंदसुतश्चारु ननर्त स्मेरमुखः ।।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

Metres with 10 Syllables in a quarter.

(पंक्तिः)

(१) त्वरितगति.

Def. त्वरितगतिश्च नजनगैः ।

Seh.G. न,ज,न,ग (५.५)

Ex. त्वरितगतिर्व्रजयुवतिस्तरणिसुता विपिनगता ।
मुरिपुणा रतिगुरुणा परिरमिता प्रमदमिता ।।

(2) मत्ता.

Def. ज्ञेया मत्ता मभसगसृष्टा ।

Sch.G. म,भ, स, ग (४.६)

Ex. पीत्वा मत्ता मधु मधुपाली
कालिंदीये तटवन कुंजे ।
उद्वीव्यंतीर्व्रजजनरामाः
कामासक्ता मधुजिति चक्रे ।ह्न

(३) रुक्मवती.

(Also called चम्पकमाला)

Def. रुक्मवती सा यत्र भमस्गाः ।

Sch. G. भ, म, स, गु (५.५)

Ex. कायमनोवाक्यैः परिशुद्धै–
यर्स्य सदा कंसद्विषि भक्तिः ।
राज्यपदे हर्म्यालिरुदारा
रुक्मवती विघ्नः खलु तस्य ।।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

Metres with 11 Syllables in a quarter.

(त्रिष्टुभ्).

(१) इन्द्रवज्रा

Def. स्यादिंद्रवज्रा यदि तौ जगौ गः ।

Sech.G. त, त, ज, ग, ग (५.६)

Ex. गोष्ठे गिरिं सव्यकरेण धृत्वा
रुष्टेंद्रवज्रोह्यतिमुक्तवृष्टौ ।
यो गोकुलं गोपकुलं च सुस्थं
चक्रे स नो रक्षतु चक्रपाणिः ।

Def. उपेन्द्रवज्रा ।

Def. उपेन्द्रवज्रा जतजास्ततो गौ ।

Sch.G. ज, त, ज, ग, ग (५.६)

Ex. उपेंद्रवज्रादिमणिच्छटाभि–
विभूषणानां छुरितं वपुस्ते ।
स्मरामि गोपीभिरुपास्यमानं
सुरद्रुमूले मणिमंडपस्थम् ।

(३) उपजाति.

Def. अनंतरोदीरितलक्ष्मभाजौ
पादौ यदीयावुपजातयस्ताः ।
इत्थं किलान्यास्वपि मिश्रितासु
वदंति जातिष्विदमेव नाम ।।

Sch. G.When इन्द्रवज्रा and उपेन्द्रवज्रा are mixed in one stanza, the metre is called उपजाति. It is said to have 14 varieties.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

Ex. अस्त्युत्तरस्यां दिशि देवतात्मा
हिमालयो नाम नगाधिराजः ।
पूर्वापरौ तोयनिधी वगाह्य
स्थितः पृथिव्या इव मानदंडः ।। Ku.1.1.

See R. 2, 5, 6, 7, 13, 14, 16, 18, Ku : 3; Ki. 17. &c.

when other metres also are mixed in one stanza, the metre is still called उपजातिः ; e.g. in the following verse from Magha there is a combination of वंशस्थ and इंद्रवंशा.

इत्थं रथाश्वेभनिषादिनां प्रगे
गजो नृपाणामथ तोरणाद्बहिः ।
प्रस्थानकालक्षमवेशकल्पना–
कृतक्षणक्षेपमुदैक्षताच्युतम् ।।

(४) दोधक.

Def. दोधकमिच्छति भत्रितयाद्गौ।

Sch. G. भ, भ, भ, ग, ग (६. ५.)

Ex. या न ययौ प्रियमन्यवधूभ्यः
सारतरागमना यतमानम् ।
तेन सहेह बिभर्ति रहः स्त्री
सा रतरागमनायतमानम् । Si. 4. 45.

(५) भ्रमरविलासित. (भ्रमरविलसिता) .

Def. म्भौ न्ली गः स्याद् भ्रमरविलसितम् ।

Sch. G. म, भ, न, ल, ग (४, ७.)

Ex. प्रीत्यै यूनां व्यवहिततपनाः
प्रौढ़ध्वांतं दिनमिह जलदाः ।
दोषामन्यं विदधाति सुरत–

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

क्रीडायासश्रमशमपटवः । Si. 4, 62.

(६) रथोद्धता.

Def. रात्परैर्नरलगै रथोद्धता ।

Sch.G. र,न,र,ल,ग (३,८ or ४.८)

Ex. कौशिकेन स किल क्षितीश्वरो
राममध्वरविघातशांतये ।
काकपक्षधरमेत्य याचित–
स्तेजसां हि न वयः समीक्ष्यते । R. 11.1.

(७) वातोर्मी

Def. वातोर्मीयं गदिता म्भौ तगौ गः ।

Sch.G. म,भ,त,ग,ग, (४, ७.)

Ex. ध्याता मूर्तिः क्षणमप्यच्युतस्य
श्रेणी नाम्नां गदिता हेलयापि ।
संसारेऽस्मिन् दुरितं हंति पुंसां
वातोर्मी पोतमिवांभोधिमध्ये ।।

(८) शालिनी

Def. मात्तौ गौ चेच्छालिनी वेदलोकैः ।

Sch.G. म,त,त,ग,ग ४.७)

Ex. अंहो हन्ति ज्ञानवृद्धिं विधत्ते
धर्मे दत्ते काममर्थं च सूते ।
मुक्तिं दत्ते सर्वदोपास्यमाना
पुंसां श्रद्धाशालिनी विष्णुभक्तिः ।।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

(९) स्वागता.

Def. स्वागता रनभगैर्युरुणा च

Sch.G. र,न,भ,ग,ग (३.८.)

Ex. यावदागमयतेऽथ नरेंद्रान्
स स्वयंवरमहाय महींद्रः ।
तावदेव ऋषिरिन्द्रदिदृक्षु
र्नारदस्त्रिदशधाम जगाम ।। N.5.1.

See Ki. 9, Si. 10.

या रक्ता वदनेनदुमण्डलगतं माधुर्यमुचैस्तरा-
मास्वाद्येह सरस्वती स्थितवती सत्यं रसज्ञेव सा।
यत्सप्तस्वरमण्डलानि बहुधा त्वत्कण्ठदेशाद्बहिः
प्रादुर्भूय मुदं श्रुतौ सुकृतिनां यच्छन्ति नन्दात्मज। २१

ஹே நந்தகோபனின் செல்வமைந்தனே ! நான் நினைப்பது உண்மையென்றுல் அந்த ஸரஸ்வதீ தேவி ரஸானுபவம் பெற்ற ரஸிகையாகத் தானிருக்க வேண்டும். ஏனெனில், உனது முழு மதியொத்த முகத்தினழகை வெகுவாக சுவைத்து அதில் தீவ்ர ஆசை கொண்டு அங்கேயே தங்கிவிட்டாளே! அது மட்டுமில்லை. உனது கழுத்திற்குள்ளே தோன்றிய ஸப்தஸ்வரங்களையும் வெளியே கொணரச் செய்து புண்ய வான்களின் காதுக்கு மகிழ்ச்சியையுமல்லாவா கொடுத்துக் கொண்டிருக்கிறுள்!

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

अन्नं न निन्द्यात् ।

--मधुकरः ।

'अद्यते' इति अन्नम् । प्रणिभिर्यद्यत् जीवनोपायतया अद्यते खाद्यते तत्तदन्नम् इत्यर्थः । अथ चाचार्या 'अत्ति' च यत्तदन्नमित्यपि व्याचक्षते । उपनिषदि एव माम्नायते च । अन्नस्य प्रकृतिमतिमहतीं विद्महे-- सा च सत्त्व-रज-स्तमोमयी । अत एव मानुष्यकेऽपि एतत्त्रिगुणमयता दरीदृश्यते । एवमविच्छिन्नभृङ्गलितप्रायमन्नमखिलस्य सम्पादयिता कश्चनास्ति ईश्वरः अन्नपतिः ईश्वरी चान्नपूर्णा । तमन्नपतिमसृकृत् स्मरन्नेव तल्लघुतया प्राप्नोतु मनुष्यः इति संकल्पेन प्रापणाय इदं मन्त्रं भोजनकालेऽवश्यं पठनीयमाम्नातवन्तः प्राचीनाः भारतीयाः ।

'अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः ।
प्र प्रदातारं तारिष ऊर्जं नो धेहि द्विप देचतुष्पदे ।।' इति ।

हे अन्नपते! अन्नरक्षक अन्नदातः भगवन्! न : अन्नस्य देहि = अस्माकमन्नदाता भव । कथं भूतस्यान्नस्य? अनमीवस्य शुष्मिणश्च = यदन्नं रोगरहितं, बल-पुष्टिकारकं च तादृशस्य दाता त्वं भव । किं च योऽयमद्य अस्माकमन्नं मनस्तृप्तिमनु ददाति, तं दातारं प्रप्रतारिषः भगवन् ! त्वं दयया तं रक्षस्व, उद्धारय, आत्मनः श्रेयस्करे कर्मणि (एतादृशे) भूयो भूयो वर्धनाय प्रोत्साहय इति प्रार्थना । किं च हे अन्नपते ! अन्नदात्रा ममाग्रे भोजनाय आस्तृते पात्रे परिवेषितमन्नं किमर्थं भोक्तव्यम्? किमर्थं स अन्नदाता प्रोत्साहनीय इति चेत् – भुक्तेनानेनान्नेन अस्माकं द्विपात्प्राणिनां चतुष्पात्प्राणिनां च बलं शारीरिक माध्यात्मिकं च सत्त्वं क्रमशो वर्धमानं भवेत् । तथा त्वं 'आधेहि' – ऊर्जं नो धेहि द्विपदे चतुष्पदे – इति प्रार्थ्यते ।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

प्रतिदिनमेवं भोजनायोपविष्टः परिवेषितमन्नं समीक्षमाणस्तस्य च सौगन्ध्यं जिघ्रन्नेवं प्रार्थ्यतामन्नपतिर्भगवान् इति सम्प्रदायविदः प्राचीनाः । किमर्थम्? इति पृच्छेयुरद्यतनाः । उच्यते–

त्रैगुण्यात्मिका प्रकृतिः कार्यावस्थां भजमाना महत्तत्त्वस्वरूपिणी यदा भवति तदा अहङ्कारः जायते । तस्मात् शब्द -स्पर्श-रूप-रस गन्धतन्मात्राः संभवन्ति । ततश्च क्रमेण पञ्चमहाभूतानामुत्पत्तिः, तदनन्तरं आकाश-वायु-तेजो-जल-पृथ्वादीनां चोत्पत्तिः भवति । जीव-जन्तु-ओषधिवनस्पतीनां चाविर्भावस्तेनैव जायते । इत्थं जगदुपत्तिशृङ्खला अनादिकालादविच्छिन्ना प्रचाल्यमाना वर्तते । केन? इति पृष्टे, अन्नपतिना तेन भगवता इति क्रमवादः प्रसिद्धत्येव । अस्य मन्त्रपठनस्यावश्यकता च 'सदा मम अन्नक्षामाभावो भवतु, 'यथेदानीं ममाग्रे स्वाद्वन्नं जिघ्रन्नस्मि तादृशं जलं वा, फलं वा, स्वादिष्ठमन्य-दन्यत् उत्कृष्टं वस्तु वा मम प्राणधारणाय प्रापयेति सादरप्रार्थनायां – भावनारूपेण – पर्यवस्यति । प्रतिदिनमेकवारभोजनाथापि अप्रकल्पमाना बहवस्सीदन्तीति श्रूयते । तादृशी दुखस्था मा भूदिति सङ्कल्प्य भगवति प्रार्थना क्रियते । यादृशी भावना स्वस्य सिद्धिर्भवति तादृशी । सदा प्रवृत्त्युन्मुखीकरणरूपं अनालस्यं अन्नगुणेनैव हि सिद्ध्यति । अन्नाभावे आलस्यं, मान्द्यं, मृत्युश्च संभवन्त्येव ।

वारुणेर्भृगोस्तपसा 'अन्नं' ब्रह्मत्वेन प्रतीतमजनि 'स तपस्तप्त्वा अन्नं ब्रह्मेति व्यजानात् इत्यादि याजुषोपनिषदि । यतो हि अन्नेन, जातानि जीवन्ति अन्नं प्रयन्त्यभिसंविशन्ति । सर्वौषधमपि अन्नम् । तादृशौषधाभावे मृत्युरनिवार्य एव । अत एव भगवान् मनुः उपांशु विज्ञापयति – 'आलस्यादन्नदोषाच्च मृत्युर्विप्रान् जिघांसति' इति । अत्रेदमवधेयमपि - यत्किञ्चित् अन्नं प्राणरक्षणायानिवार्यमिति मात्रं न, स्वास्थ्यप्रदमन्नं एव प्राणरक्षणायालं भवति । अतः भगवत्प्रार्थनया

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

लब्धमतिस्वल्पमपि स्वादिष्टं, बलवर्धकं, सात्विकगुणभूयिष्ठं च भूयात् । श्रीमद्भगवद्गीतायां एवं जोघुष्यते–

आयुस्सत्त्वबलारोग्यसुखप्रीतिविवर्धनाः ।
रस्याः स्निग्धाः स्थिरा हृद्या आहारास्सात्त्विकप्रियाः ।। इति ।

किं च, तत्रैव एवं भगवता ज्ञाप्यते–

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ।। इत्यपि ।

आयुर्वेदे एवं हि स्थिरीक्रियते – यस्मिन्देशे हि यो जातः तदन्नं तस्य वै हितमिति । ऋत्वनुयोगतः, मितस्य, हितस्य, चैवाहारस्य आनुकूल्यसाधकत्वं हस्तस्थितमिति च ।

मितं भुक्त्वा शतं जस्वा गत्वा शतपदानि च ।
वामभागे शयानस्य भिषग्भिः किं प्रयोजनम्? -इति च

स्मारयन्ति आयुर्विज्ञानवादिनः ।

'अन्नपतिः' इति संस्कृतपदं किं चित्सूक्ष्मतयाऽपि अवधेयं भवति । आध्यात्मिकदिशा भगवानेकः अन्नपतिः इति साधुसामञ्जस्यमावहति । आधिभौतिकतयाऽन्येप्यन्नपतयः गौणपक्षे सामर्थ्यात्समापतन्ति इति सूक्ष्मम् । तत्कथम्? चिन्त्यताम् । बीजावाप-जलसेचन-दोहदासिंचना-दिबहुविधप्रयास साधकाः, अन्ये च क्षेत्रपति-कृषक-कृषिवैज्ञानिकादयः आनुषङ्गिकतया अन्नपतय एव ननु ! बहुना किम्? पशु-पक्षि-कीट-पतङ्ग-भूमि-प्रकृतिरूपा अपि तथा संभाविताः । तेऽपि अत्रत्यान्नपति शब्देन समायोज्यन्ते । तेषां सर्वेषां मन्त्रेणानेन कथंचिदन्नस्य अभिवृद्धि-प्रदातृत्वतया स्मरणं, 'प्र प्रदातारं तारिष' इति तत्सन्नाहनं चाविरुद्धं प्रतिभाति । अन्यथा तेषां कृतज्ञताप्रकटनं

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

समुचितं कथं संभवेत्? भोजनसमये अन्नदातृणाममीषामपि मानसिकं कार्तज्ञ्य प्रकटनं न विरुद्ध्यते; कोऽन्योऽवसरः लभ्येत कार्तज्ञ्यप्रकटनाय एतेन अन्नदोषोऽपि निवर्त्यते । निन्दा च ।

सर्वथा, वेद-शास्त्रनिन्दितमन्नं वर्जयेत् । मितं, हितं, आयुष्यमोजस्करं चान्नं न निन्द्यादेव ।

कचधार्यं देहधार्यं परिधेयं विलेपनम् ।
चतुर्धा भूषणं प्राहुः स्त्रीणां मन्मथदैशिकम् ।।

பெண்களுக்கு அழகையூட்டும் அலங்காரப் பொருட்கள் நால்வகை - தலைக் கொண்டையில் அணியப்படுவது, உடலில் அணிப்படுவது, தைத்து உடலில் அணிந்துகொள்ளும் ஆடைவகைகள், பூச்சுப் பொருட்கள் ஆகியவை. --அலங்கார ரஸாகரம்.

धैर्यं धिक्कुरुते, त्रपां विचिनुते, कौलं यशः प्रोच्छति
प्रत्येकं गुरुवर्गगञ्जनशतं विस्मारयत्यञ्जसा।
साध्वीनाम निराकरोति भवनं भर्तुर्विधत्ते विषं
किं किं नो विदधाति हन्त सुदृशां वंशीनिनादस्तव!।।

ஹே கண்ணபிரானே ! உனது புல்லாங்குழலின் இனிய கீதம் ஆயர்குலப் பெண்மணிகளுக்கு தைர்யம் நிலை குலையச் செய்கிறது. வெட்கத்தை தேடச் செய்கிறது; குலப்பெருமையை துடைத்து விடுகிறது; ஒவ்வொரு வருக்கும் அவரவர் பெற்றோர் கூறிய பலவகை மொழிகளையும் சட்டென மறக்கச் செய்கிறது; 'ஸாத்வீ' என்ற நற் பெயரை நீக்கிவிடுகிறது; கணவன் வீட்டை விஷ மென நினைக்கச் செய்கிறது. இவ்வாறு என்னவென்னவோ செய்கிறதே அந்த இனிய புல்லாங்குழல் கீதம் !

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

करुणामृतम् । (श्रीगुरुवायुपुरेशवैभवम्) अनुवर्तते

—तामरश्शेरि शङ्करन् भट्टतिरिकृतम् ।

दुष्टो गुणेन निजितो भवतीति सिद्धम्,
यद्विप्रवेषमदधास्सह पाण्डवाभ्याम् ।
तेनादृतः क्षितिसुर-प्रियमागधेन
भूतद्रुहं यमवधीदथ भीमसेनः ।। १

गोविन्द ! सर्वविपदो मनुजास्तरन्ति
त्वत्सेवनेन, मगधेशनिरुद्धभूपाः ।
कारागृहेऽपि, भजनादुचितात्तवास्त-
तापा बभूवुरनुकार्यमिदं सुधीभिः ।। २

आघोषितातुलयुधिष्ठिरराजसूयं
अङ्गीकृताखिलजगद्विनुताग्र्यपूजम् ।
भक्तस्य गौरवमभक्तपराजयं च
निस्संशयं प्रकटयन्तमुपाश्रये त्वाम् ।। ३

सर्वाणि कृष्ण ! सहसे परभर्त्सनानि
नैवात्मपक्षनिहितानि तदुद्यतं त्वम् ।
रोषाज्जघन्थ शिशुपालमिदं व्यनक्ति
स्वस्मादपि प्रियतरोऽस्ति तव स्वभक्तः ।। ४

जन्मत्रयप्रकटवैरमपि स्वलीला-
सम्पोषकं निजपदच्युतदन्तवक्त्रम् ।
अक्षोभ्य ! मूर्धनि विषह्य गदाप्रहारं
मुक्तं, व्यधाश्च विजयं प्रणमामि तं त्वाम् ।। ५

भूभारनाशनरणे निहतास्त्वया ये
साल्वादिदुष्टमतयः कृतलोकपीडाः ।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

सर्वेऽपि ते सुकृतिलभ्यविमुक्तिमापुः
त्वन्निग्रहोऽपि समनुग्रह एव सिद्धः ।। ६

वव्रे सहायमखिलेश ! भवन्तमेकं
दुर्योधनादिविजयाय पृथातनूजः ।
सप्रश्रयं तदनुसृत्य भवत्पदाब्जं
संसारसङ्गरजिहीर्षुरहं प्रपद्ये ।। ७

युद्धोद्यतं रथगतं परितापयुक्तं
स्नेहेन पार्थमुपदिश्य परात्मतत्त्वम् ।
यः कर्मधीरमकरोत् धृतसूतवेषं
तं ज्ञानमुद्र ! दृढवेत्रकरं भजे त्वाम् ।। ८

कामान् अहङ्कृतिमुपाधिकृतं ममत्त्वं
चोपेक्ष्य यश्चरति, याति स एव शान्तिम् ।
गीतोपदिष्टमिदमाचरितुं कदा स्यां
शक्तश्च, तज्जनितनिर्वृत्तिमग्नचित्तः ।। ९

युद्धं हि जीवितमिदं बहुदुर्विकार-
सङ्घर्षतस्त्वयि तथापि समस्तकर्म ।
संन्यस्य यो नयति, तस्य जयः करस्थः
प्रोक्तं त्वया, कुरु विभो ! तदवाप्तिधन्यम् ।। १०

योगानुशीलनविमोचितकर्मबन्धं
ज्ञानाग्निदग्धभवसञ्चितसर्वपापम् ।
निष्कामकर्मकृतमात्थ च पण्डितं तत्
काम्यं पदं किमपरैर्बिरुदैरगण्यैः ।। ११

उक्तं त्वया यदुपते ! शुनि च श्वपाके
विद्वत्तमप्रकटितं समदर्शनत्वम् ।
एतन्निदर्शनमनुक्रममत्र नाम-
देवं स्मरामि च बहुश्रुतविष्णुदासम् ।। (अनुवर्तते) १२

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

ஸம்ஸ்க்ருதத்தை எளிதில் கற்க எமது பாட நூல்கள்

ஸம்ஸ்க்ருதஶ்ரீ பாடமாலா
1—7 பாகங்கள் ஒவ்வொன்றும்
ஸம்ஸ்க்ருதஶ்ரீ அகராதி
(Dictionary Sanskrit & Tamil)
தமிழ் - ஆங்கிலப் பொருளுடன்
தாதுமாலா (300 தாதுக்கள்) முதல்பாகம்
சப்தமஞ்ஜரீ, அவ்யயகோசம்
க்ருதந்தரூபமாலா (Vo1. 1 to 5)
பாடமாலா ஆங்கிலம் 1 & 2
ஸம்ஸ்க்தஶ்ரீ மாதப் பத்திரிகை ஆண்டு சந்தா
ஆயுள் சந்தா ரூ. 400/-
புத்தகம் அனுப்ப தபால் செலவு தனி
விவரமறிந்து பணம் அனுப்பவும், விலை மாறுதலுக்கு உட்பட்டது.

பாட புத்தகங்கள் கிடைக்குமிடம் :

1. ஸௌஸைடி கார்யாலம். 212/13-1 St, Marry's Road, Mandiaveli, Chennai-28
2. M/s. விஜயா ஸ்டோர்ஸ், மயிலாப்பூர், 24954932
3. M/s. ஶ்ரீ மார்க்கண்டேயர் புக் கேலரி, கும்பேஸ்வரர் ஸந்நிதி, கும்பகோணம் . Ph: 2420750
4. M/s. அக்ஸ்த்யர் புக் டெப்போ, தெப்பக்குளம், திருச்சி-2 தொலைபேசி : 2700061.
5. M/s. அருள் நந்தி சிவம் புத்தக நிலையம், ஜங்க்ஷன்,, திருநெல்வேலி-627001.
6. ஜயலக்ஷ்மீ இண்டோலோஜிகல் புக் ஹௌஸ், 6, அப்பர் ஸ்வாமி கோவில் தெரு, மைலாப்பூர், சென்னை-4 Phone : 24990539.
6. பவானி புக்ஸெண்டர், 19, ஸ்டேஷன் ரோடு, மேற்கு மாம்பலம், சென்னை-33 Ph: 24748124

Lasertypesetting & Printing Sanskrit, Tamil, Grantham & all Languages
: V.K.N Enterprises, Mylapore, Chennai-4 98402 17036

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

ग्रन्थलिपिपरिज्ञानम्

சில 'க' காரத்துக் கட்டங்கள்		சில 'கு' காரத்துக் கட்டங்கள்	
கூ2:	ππ:	ஸாடகா:	கூாஜிகா:
ஹா:	ஸஸ:	ஸாஸகா:	ஸாடகா:
ஸ்ரி2:	ஹாஸ:	ஹாஸஸ:	ஸாஜுகா:
ரிவிஸ:	ஸஸாஸ:	ஸாஜகா:	ஹகூகா:
ஸ்ர:	ஸணா:	ஸாடகா:	ஸ்ரிகூகா:
ஃபி:	ஸ்ர:	ஸாஜிகா:	ஸாணஸா:
ஸாஉ:	ஸ்ரி:	ஸாஹா:	கூாஸகா:
ஸணா:	ஸஸ2:	உாஹா:	ஸாஜிகா:
		ஸாஹா:	ஸாஜிகா:
		ஃபி:	

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

சில 'ஐ' காராந்த சப்தங்கள்

உதி:	ஹவதி
வநி:	ஹவதி
நிஸி:	டீவதி
ஜயி:	வஹதி
நியி:	ஹீஹதி
ஸவி:	யாவதி
கூவி:	நிஸதி
வியி:	ஜயதி
ஸவி:	டீரவஹதி
டீவி:	ஹவதி

யதி:	ஸாயதி
கூஷதி:	ஸிகூஷயதி
ஜிடீபி:	ஸஹயதி

டீணிதி:

கீழ்கண்ட சுலோகங்களை க்ரந்தலிபியில் எழுதுக--

आपदामपहर्तारं दातारं सर्वसम्पदाम् ।
लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ।।

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ।।

सरस्वति नमस्तुभ्यं वरदे कामरूपिणि ।
विद्यारम्भं करिष्यामि सिद्धिर्भवतु मे सदा ।।

देवनागरिलिप्यां लिखत—

ஔவ ஔவ ஸுதம் ஔவம்
ஜமஜிவ்ஹ விநாயகுதழ ।
ஹஸ்திமுஔவ உஹாகாயழ
ஸுயுகொடிஹஉவ்யஹழ ।
ஔஹ்யுயுக்தா சதுஹிு:
ஷ்டகுஉணிஉயீஉக்ஷஉாஙுயாநா।
ஹஷ்டெநெகெந டஉ்ம் ஸிதஉ
டிச முகும்
டுஸ்துகுஹ்மாவொணெ ।।

ஹாஹாகுுநெந்முஜ்ஷ்டிகுநிஹா
ஹாஹஉாநாஃஹஉாநா
ஸா ஔ வாழ்ஔவதெயம் நிவஹத
வஉநெ ஸவுஉா ஸுவ்யஹஸா

ஸமஷ்டி நஉஸ்துஹ்யம்
ஸவுஔவி நஔ நஉ: ।
முாகுஷ்டுமுஔவ்முமுியஔ
ஸவுயொமெ நஔ நஉ: ।।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

'Hi- Energy' Silver Zinc
Nickel Cadmium Cells

UNIQUE FEATURES

High Energy Density * Capability of very High rate discharge * Long life * Economical * Extremely Rugged * Wide Range

For further details please contact / write to:

High Energy Batteries (India) Limited

(FORMERLY SIMCO METTERS LTD. BATTERY DIVISION)
MATHUR - 622 515
(PUDUKKOTTAI DISTRICT)
Regd. Office:
Eswin House, Perungudi, Chennai - 600 096

With best Compliments

SRI S.V. PARASURAMAN
(Proprietor)

RAM ENTERPRISES
Mylapore, Chennai - 4

Dealer :

Hindustan Petrolium Corporation Ltd.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai
Date of Publication : 10th of every month
REGISTERED Registration No. TN / CC (S) DN / 443 / 15 - 17
TN / PMG (CCR) / WPP 696 / 15 - 17
Registration with Registrar News Paper of India 30478 / 77
SAMSKRITASRI

With best compliments from :

LITEROOF

(Poineers in Manufacture of Asphaltic Corrugated & Plain Roofing Sheets)

NEW TUF-10 SER

(Janatha - Deluxe - Expodel Expo - 10

LITEROOF

IS

(Economical * Flexible * Durable * Weather Proof

* Fire-Resistant

LITEROOF

FOR

*Factories - Theatres * Schools * Housing * Poultry *

Dairy Farms etc.,

LR

LIGHT ROOFINGS LIMITED

No. 35, 7th Street, V.S.I. Estate Phase II,
Thiruvanmiyur, Chennai - 600 041
Phone : 2454 4949 * 2454 4950

Printed by : Zigma Graphics, 9/1, Thirtharappan Street, Triplicane-5
Edited and Published by Sri S. Srinivasa Sarma on behalf of the Samskrit Education Society (Regd.)
Old 212/13-1, New No.11, St. Mary's Road, R.A. Puram, Chennai - 600 028.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,